Topic 74 युष्मद् तथा अस्मद् सर्वनामों के स्थान पर विहित आदेश

युष्मदस्मदोः षष्ठी-चतुर्थी-द्वितीयास्थयो-र्वान्नावौ ।

पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वान्नावौ स्त्यादेशौ स्तः ।

बहुवचनस्य वस्नसौ ।

उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः

यह सूत्र पूर्वसूत्र का अपवाद है ।

तेमयावेकवचनस्य ।

उक्तविधयोरनयोः षष्ठी चतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः ।

त्वामौ द्वितीयायाः ।

द्वितीयैकवचनान्तयोस्त्वा मा इत्यादेशौ स्तः ।
श्रीशस्त्वाऽवतु माऽपीह, दत्तात् ते मेऽपि शर्म सः

स्वामी ते मेऽपि स हरिः, पातु वामपि नौ विभुः
सुखं वां नौ ददात्वीशः, पतिर्वामपि नौ हरिः ।
सोऽव्याद् वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः ।

वा० - एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकतिङ् वाक्यम् । तेनेह न - ओदनं पच तव भविष्यति । इह तु स्यादेव - शालीनां ते ओदनं दास्यामि ।